क्तसाध्यस्य सत्वात् न व्यभिचारः रूपस्पर्शगन्धान्यतरत्वादिसत्तायां [illegible] धवारणाय जातीति परिशेषानुमान
माह गुणश्चेति शब्दो द्रव्याश्रितः गुणत्वात् रूपादिवदित्यनुमानादिभावः अत्र सामान्यतः प्रसक्तस्य
पृथिव्यादिवृत्तित्वस्य प्रतिषेधं दर्शयति नचेति शब्दो न पृथिव्यादिगुणः श्रोत्रग्राह्यत्वात् रूपादिव
दिति केवलव्यतिरेकि तत्र व्यतिरेकव्याप्तिं दर्शयति यदीति विशेषगुणत्वादिति तत्पूर्वोक्तानुमा
नेन सिद्धं रूपादिवदिति दृष्टान्तो बोध्यः पक्षधर्मताबलाच्छिष्यमाने से प्रत्ययं दर्शयति अतइति एभ्यः
पृथिव्याद्यष्टभ्य इत्यर्थः सबलाघवादेकएवसिध्यतीत्याह सचैकइति ननु नानादेशेषु शब्दोपलम्भानु
पपत्तिरेव भेदे प्रमाणं भविष्यतीत्यत आह एकत्वेनचेति विभुत्वादेव सर्वत्र शब्दोपलम्भसंभवादिति भा
वः सामान्यघ्येति अनेकसमवेतत्वे सति नित्यत्वमेव सामान्यत्वमिति भावः परमाणवादौ तदेकत्वा
दौ चातिव्याप्तिवारणाय सत्यन्तं संयोगादौ चातिव्याप्तिवारणाय नित्यत्वमिति एकत्वेपि सर्वत्र शब्दो
पलम्भसमर्थं नायाह विभुत्वेति अनवच्छिन्नपरिमाणत्वं विभुत्वमित्यभिप्रायेणाह परममह
दिति सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं बोध्यं विभुत्वसाधकमाह सर्वत्रेति कार्यस्य शब्दस्य सर्वत्रोपल
ब्धेः सर्वत्रैव कारणस्याकाशस्यानुमानमित्यकस्य विभु [illegible] त्वमायातीति भावः नित्यत्वे साधकमाह
अतएवेति अतएवाव्यवहितप्रतिपादितादेव विभुत्वादिति सामानाधिकरण्येनान्वयः अत्र द
धिधवलमाकाशमिति प्रतीतिरौपाधिकी धवलस्फामंडलसंबंधात् लोहितस्फटिकप्रतीतिवत्
निर्मलनभसि नीलरूपप्रतीतिः किमौपाधिकीत्यत्र भगवान् पतंजलिः भूगोलमध्यवर्तिनः सुमेरोः

ति३

गो॰ कौ॰ ७५

नीतादिरूपक्रियाकार्ययोः जन्यमात्रमेव कालोपाधिरिति नवीनाः इदमवधेयं इदानीं घटो नेदानीं घट इत्या
दिप्रतीतीनां महाकालविषयत्वेनुपपत्तेः कालोपाधिविषयता कल्प्यत इति एकस्याप्युपाधिभेदात् संज्ञाभे
दे दृष्टांतमाह पुरुषस्येवेति एवं क्षणादिभेदोपि बोध्यः विभागप्रागभावविशिष्टस्य कर्मणः क्षणत्वपक्षा
लोपाधित्वात् पूर्वसंयोगविशिष्टस्य ह्युत्तरक्षणत्वादीत्यादिक्रमेण पलदंडमुहूर्ताहोरात्रपक्षमासभेदादू
हनीयाः नित्यत्वं साधयति कारिकाकार माह नित्यत्वादिति पूर्ववदिति व्याख्यातार्थं दिशं लक्षयति दूरान्तिके
ति एकेत्यादि पूर्ववत् पूर्ववद्बोध्याः अस्याः पंचगुणत्वमाह संख्येति उपाधिभेदमाह पूर्वादीति
पूर्वा दिक् दक्षिणा दिगित्यादिप्रतीतीनां यन्निमित्तं तदेव दिगित्यर्थः तत्र यद्दूरपर्वते समस्यां दिशि सूर्यो
दयः सा पूर्वा दिक् तदभिमुखस्य पुरुषस्य दक्षिणभागे दक्षिणा दिक् वामभागे तूत्तरा पृष्ठभागे प
श्चिमा मस्तकोपरि ऊर्ध्वा दिक् पादादधः एवं कोणचतुष्टयमपि विदिगिति क्रमादूहनीयं एतत्सतीति
सुमेरुपृथिव्यादिरूपं तत्तद्विषयसाध्यातिदर्शयति नैवामिति पूर्वादिप्रत्ययानामित्यर्थः तदेव प्रति
पादयति स्वोपाधिनेति तादवस्थ्यादिति स्वरूपतो भेदाभावादित्यर्थः अयं भावः एकस्मिन्नेव वस्तुनि किं
चिदपेक्षया सूर्योदयसन्निहितत्वात् पूर्वत्वं किंचिदपेक्षया तद्वैपरीत्येन पश्चिमत्वमिति नतेद्वि
षयाणां दिक्प्रतीतिनियामकत्वं किंतु सर्वद्रव्यातिरिक्तद्रव्यस्य दिश एवेति अस्याप्येकत्वे न द्वय
मेतस्मात् पूर्वादिकं न पश्चिमेत्यादिप्रतीत्युपपत्तये मूर्तमात्रस्यैव दिगुपाधित्वेन विषयता स्वीक्रिय
त इत्याह सैवेकापीति एवं पूर्वोक्तरीत्या दैशिकपरत्वापरत्वासमवायिकारणसंयोगाश्रयतया
पि दिक्सिद्धिरूहनीया अत्र वदंति दिक्कालावीश्वरादिनातिरिक्तौ तथाकाशमपि शब्दादिहेतुतया

एवमपरत्वेपि वोध्यं संनिधानादिति संयुक्तसंयोगानामल्पीयस्त्वात् दैशिकापरत्वोत्पत्त्यर्थे: विपरीतमिति दैशि
कपरत्वमिवैकालिकपरत्वमित्यर्थः एवमग्रेपि व्याख्येयं व्यवधानादिति संयुक्तसंयोगानां भूयस्त्वात् दैशि
कपरत्वोत्पत्त्यर्थं: [illegible]दि विपरीतपरत्वापरत्वे उपसंहरति तदिदमिति तामेवं [illegible] कालानुमाने दर्शय
ति कार्यमिदिति अनुमा[illegible] यतीत्यनेन भिन्नकारणस्योत्पत्तिभावप्रधानो निर्दिष्टः दिगादेः कारणत्वस्यासंभवा
दित्यर्थः अयमाशयः यो यद्बहुतरतपनपरिस्पन्दान्तरितजन्मा निसंनिहितदेशस्थः परोयमिति प्रत्ययः स न दि
क्कृतपरत्वाधीनः तस्यासंनिहितदेशस्थतया दिक्कृतपरत्वाभावात् प्रत्युत दिक्कृतमपरत्वमेव तस्य अपि
च दिक्कृतपरत्वादि स्यापत्ते यथा अमुकस्येदं परमिदमपरं चेति कालकृतं तत्तु निरपेक्षं सर्वसैव बहुः पराव
लोऽपरः यथा वर्तमानत्वादिकं सर्वसाधारणं तद्वत् तथा च न तस्य दिग्जन्यता नयपि यादिजन्यत्वं वाले
यिपरत्वोत्पत्तिप्रसंगात् न च तत्तपनपरिस्पन्दानामेव हेतुत्वमस्त्विति वाच्यं तेषां तपनसमवेततया शरीरसं
बंधाभावेन तल्लिङ्गपरत्वादिज्ञानकत्वानुपपत्तेः तस्माद्यद्बहुतरतप नपरिस्पन्दवानित्यादिप्रतीतिनियाम
कस्य कालिकसामानाधिकरण्यस्य सिद्ध्ये काल एकः कल्पनीयः तथा च बहुतरस्पन्दं परत्वसमवायिका
रणजन्यं जन्यगुणत्वाद्रूपवदित्यनुमानादितरबाधात् समवायिकारणं कालसंयोग एवायाति तत्र कालिक
सामानाधिकरण्येन बहुतरतपनक्रियावत्त्वज्ञानं परत्वोत्पत्तिनिमित्तं अल्पतरतपनक्रियावत्त्वज्ञानं चाप
रत्वोत्पत्तिनिमित्तं पूर्वोक्तयुक्त्या कालस्यैकत्वे सिद्धे वर्तमानातीतत्वादिभेदप्रत्ययानुपपादयति तच्चैकोपीति
वर्तमानेति स्वध्वंसप्रागभावानधिकरणकालवृत्तित्वं क्रियाया वर्तमानत्वं एवं वर्तमानध्वंसप्रतियोगित्वमती
तत्वं तथा वर्तमानप्रागभावप्रतियोगित्वं भविष्यत्वं तथा च वर्तमानादिरूपाया क्रियायाः सैवो[illegible]पाधेर्विशे

षणं तद्घटादेः कोपिकाले वर्तमानादिसंज्ञामेव लभते वर्तमानक्रियाविशिष्टो वर्तमान इत्युच्यते एवम

शेषः सुखदुःखादिकारणतावच्छेदकतया सिद्धः तेनाभिसंबंधात् समवायात् मन इतरस्योपि घटेति
शेषः तच्च मनो विभु नित्येन्द्रियत्वात् आत्मवत् ज्ञानासमवायिकारणसंयोगाधारत्वाद्वा स एव तु
विषयाणुत्वं अन्यत्र आत्मादिक्कालवदित्याद्यनुमानेन मनसो विभुत्वमिति मीमांसकाः तन्मतं निरा
करणायाह अणुपरिमाणमिति अयमभिप्रायः अस्ति तावत् सर्वेषामिन्द्रियाणां स्वस्वविषयसं
न्निकर्षेपि व्यासंगदर्शनात् किंचिदिन्द्रियजन्यज्ञानं भवति किंचिदिन्द्रियजन्यं ज्ञानं न भवति तदनुभ
वः व्यासंगान्यथानुपपत्त्याद्यनुभवात् तच्च मनो यदि विभु स्यात् तदैकदा सर्वेन्द्रियसंयोगसंभवात्
सर्वेन्द्रियजन्यज्ञानं स्यात् तस्मादणु मनः तस्य च यदिन्द्रियेण संबंधः तज्जन्यं ज्ञानं जायते येन सह सं
बंधो नास्ति तज्जन्यं ज्ञानं न जायत इत्युपपत्तिः एवं क्रमेण सिद्धे मनसो अणुत्वमनेकैव मन्तव्यमानाना
नाप्रयोजकत्वं च बोध्यं न च युगपत्सैव नियामिका अन्यथा तस्य विभोर्मनः संयोगयुगपत्सित
स्यैव ग्रहो नान्यस्येति नियमो न स्यात् तस्माद्व्यासंगस्थले युगपत्सित्तस्यैव बाधकमिति मनो वैभवे पि
नष्टमिति दिदिवान्ये सर्वेषु युगपत्सा यथा हेतुत्वे मानाभावात् अयुगपत्सितस्यापि विषयादेर्ग्रहणात् एककाली
नप्रत्यक्षस्य चित्रग्रहे युगपत्सायाः उपयोगः फलवत्त्वात् एवं गीतादौ भक्षिधानस्यानिकेधध्यं यत्तु
मनसो विभुत्वे मनः संयोगस्यासमवायिकारणस्य सार्वत्रिकत्वात् सर्वत्रैव शरीरे सुखाद्युपलंभा
पत्तिरिति तन्न मनसो विभुत्वेपि चंदनादिसंयोगो यदवच्छेदेन तदवच्छेदेनैव सुखाद्युपलब्धेः संभ
वात् मनसोणुत्वपक्षेप्यतस्यावश्यं वाच्यत्वात् अन्यथा सुखादेरणुदेशोत्पत्तेः एवं च दीर्घ
शष्कुलीभक्षणादिस्थले पंचेन्द्रियजन्यज्ञानानां योगपद्यं वा धीभ्रमः सत्क्रमकालानां भेदाग्रहात्

ईश्वरस्यैव संभवेनातिरिक्तकल्पने प्रमाणाभावादिति तन्न युक्तं शब्दस्येश्वरात्मगुणत्वेऽन्येषां प्रत्यक्षविष
यता न स्यात् अन्यात्मगुणानामन्याप्रत्यक्षत्वात् अन्यथातिप्रसंगात् कालिकदैशिकपरत्वापरत्वयोः
परस्परवैलक्षण्यं च न स्यात् समानसामग्रीकत्वात् अपिच शब्दादिकं प्रति क्लृप्तत्वादीश्वरस्यैव हे
तुतायां कल्प्यमानायामनंतजीवात्मस्वेकीरादाय विनिगमनाविरहादेकमतिरिक्तमप्यशक
ल्प्यते एवं कालादेरपि बाधः अन्यथा ईश्वरोऽपि न सिध्येत् क्षितिः सकर्तृकेत्यनुमानेन जीवस्य क
स्यचिदेव नित्यज्ञानादिमत्त्वसिद्ध्या चरितार्थत्वसंभवात् तस्माज्जीवविभुविनिगमनाविरहात्सर्व
त्र नित्यज्ञानादिकल्पने गौरवात् लाघवेनैक एवेश्वरात्मा तथा कल्प्यते एवं च सकर्तृत्वेऽपि तुल्यं न च
श्वरस्य कार्यमात्रहेतुत्वं क्लृप्तं न जीवानामीश्वरस्य शब्दादिहेतुतायां विनिगमकमस्तीति वाच्यं
शब्दं प्रतीश्वरस्य समवायिकारणतायाः परत्वादेकं प्रतीश्वरसंयोगस्यासमवायिकारणतया क्ला
(वं) क्लृप्तत्वेन तुल्यत्वान्निमित्तकारणे विशेषमेव नचाकाशस्यापि शब्दसमवायिकारणत्वे तथैव वि
निगमनाविरह इति वाच्यं विनिगमनाविरहकल्पितत्वस्यैव विनिगमकत्वादित्यादि स्वयमूह
नीयं क्रमप्राप्तमात्मानं लक्षयति आत्मेति आत्मत्वस्य जातिसिद्ध्यर्थं प्रयोगमपि आत्मत्व
ज्ञानानात्मत्वं सयुक्तिकमाह सुखदुःखादीति इदमपि प्रयोगे व्याख्यातं देहाद्यतिरिक्ते आत्मनि प्रमा
णकोक्तायां तु बुद्ध्यादिगुणलिंगकमिति पूर्वोक्तं स्मारयति तच्च रूपवेति चतुर्दशगुणवत्त्वमस्य दर्श
यति तस्येति बुद्ध्यादय इति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनारूपा नवेत्यर्थः एवं च
दिति सर्वत्र कार्योपलब्धेः विभुत्वं नित्यत्वं चेत्यर्थः [illegible] येन स्वत्वसामान्य वि

कारादेशिक परत्वापरत्वयोरपि ग्रहणं बहिरिंद्रियसहकारी मनसो दर्शयति यत्तं योगेनेति आत्मसंयोगो
न बहिरिंद्रियसंयोगेन च व्यापारेण बहिरिंद्रियजन्यविषयप्रत्यक्षे कारणमित्यर्थः आत्ममनःसंयोग
शरीरमनःसंयोगयोरपि ज्ञानहेतुत्वे तावपि बोध्यौ अत एवेति यतः आत्मग्राहकं सुखाद्युपलंभ
कं बहिरिंद्रियाग्राह्यग्राहकं च मनः अत एवेत्यर्थः सर्वेति सर्वजन्यज्ञानकारणमित्यर्थः तेनेश्वरज्ञा
नस्यानित्यत्वेपि न सर्वपदासंगतिः पूर्वं प्रमाणमुपदर्शयितुमवतारयति तत्प्रत्यक्षमिति अ
णुत्वान्नीरूपद्रव्यत्वादिति प्राचः अनुमानं दर्शयति सुखदुःखाद्युपलब्धय इति चक्षुरादीति
चक्षुरतिरिक्तकरणसाध्या अंधादेरसत्यपि चक्षुषि जायमानत्वात् एवं च गतिरिक्तकरणसाध्या
कुष्ठ्यादेरसत्यपि त्वगिंद्रिये जायमानत्वात् इत्यादिक्रमेण प्रत्येकं बहिरिंद्रियातिरिक्तकरणसाध्य
त्वेनात्र स्याप्यदृष्टविशेषाय निबद्धकरणैः प्राकृत्यभावादेर्भावः चक्षुरादौ व्यभिचारवारणाय
असत्यपि चक्षुषीत्यादिकं नित्यव्यभिचारवारणाय सत्वादित्युपेत्य जायमानत्वादिति तेन सर्वब
हिरिंद्रियसत्वस्य जीवतः कस्याप्यसंभवेन हेतुविशेषणासिद्धिरिति प्रत्युक्तं असत्त्वपि वा पक्ष
रहितेप्यपीत्यर्थः इति किंचित् एतावद्धर्मतावलम्भ्य साध्यं दर्शयति पक्षेति लाघवज्ञानोपनीत
मिति कर्तृरेकत्वमिव सुखोपलब्धिकरणस्याप्यणुमनुमितौ विषयो भवतीति दर्शयितुं पूर्वो
क्तं मनसोऽणुपरिमाणवत्वमनुवदति तच्चाणुपरिमाणमिति मनसो व्यापित्वे तादव यवानां का
र्यकारणभावानां च कल्पना गौरवं विभुत्वे चानंतमूर्तसंयोगविभागतन्नाशप्रागभावानां च कल्प
ना गौरवं पूर्वोक्तयुक्तिविरोधश्चेति लाघवादणुपरिमाणमेव मनः कल्प्यत इति भावः इदंत्वबोध्यं

एवांशं शब्दगुरुत्वव्यवच्छेदेन पुरुषप्रयत्नक्रियाजनकप्रयत्नेषु बोध्यं एवं एतावायत्नो विशिष्टक्रियाजनकः कल्पनी-
यः कश्चित्तु मनोऽवयविनस्य च संकोचविकाशाभ्यामेव व्यासंगश्चेन्द्रियसन्निधाने योगपद्यस्योपपत्तिरि-
त्याह तन्मते संकोचविकाशौ प्रति अदृष्टविशेषयोरेव नियामकत्वमवश्यं वाच्यं तथा च तैर्व्यासंगा मेवका ३
नुपपत्तौ मनोऽवयवानां तत्कार्यकारणभावादीनां च कल्पनागौरवात् लाघवेन निरवयवस्यैव क-
ल्पनात् न चादृष्टाभावादेव व्यासंगस्थले ज्ञानाभावोपपत्तेः मनसो विभुत्वमेव साम्प्रतमिति वाच्यं इं-
वेर्द्रियसन्निकर्षादिरूपदृष्टसामग्रीसमवधाने अदृष्टस्याप्यावश्यकत्वात् अन्यथा चक्षुरादेरपि
अनंगीकारापत्तेः अंधादेरदृष्टविशेषाभावादेव रूपादिविषयप्रत्यक्षाभावोपपत्तेरित्यलं बहुना
साधर्म्यान्तरमाह संयोगीति यद्यपि संख्यादिगुणवत्त्वमेव द्रव्यमात्रवृत्तितया इदं वैधर्म्यं तथापि संयो-
गं तारेन्द्रियमनसां साधर्म्यं बोध्यं संयोगप्रत्यासत्त्या आत्मग्राहकेन्द्रियत्वं लक्षणमित्यर्थः ज्ञानलक्षणा-
दिप्रत्यासत्त्या आत्मग्राहके चक्षुरादावतिव्याप्तिवारणाय संयोगेत्यादि संयोगेन चक्षुरादिग्राहकेत-
त्रैवातिव्याप्तेः आत्मपदं संयोगेनात्मसाक्षात्कारे शरीरे अतिव्याप्तेरिन्द्रियपदं त्वङ्मनोयोगस्ये
रिद्र
वजन्यज्ञानसामान्ये हेतुत्वात् ननु त्वगात्मसंयोगस्यापि तत्रातिव्याप्तिः साधर्म्यान्तरकथनमुद्रण
प्रमाणास्त्वयमिति सुखादीति नित्यमिति लाघवादिति शेषः अथ गुणवत्तो द्व्योपत्ति संख्यादी
ति संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवदित्यर्थः ननु संख्यादिपदेन
विभक्तांत पंचगुणवत्ताभोक्त्र मूर्तत्वेन दैशिकपरत्वापरत्वयोगानामपि संभवात् अत एव मूर्त-
त्वात्परत्वापरत्वसंस्कारेभ्यो नेतिभाष्यं क्वचित्पुस्तके संख्यादिपंचगुणवत्त्वमेवेत्यादि निपाठस्तत्र च

१०.कां०

९८

लक्षणंस्मरमप्याह सर्वेति द्रव्याश्रितत्त्वंद्रव्यसमवेतत्वं इदंच यद्यपि कर्मादावतिव्याप्तं तथापि द्रव्यस
मवेतमात्रवृत्तिनित्यानित्यवृत्तिपदार्थविभाजकोपाधिमत्त्वं गुणत्वमित्यदोषः द्रव्यत्ववत्तया द्रव्ये
ऽतिव्याप्तिवारणाय परत्वांतं असमवेतत्वार्थकं एतस्याभावे द्रव्याश्रितत्वमेवस्यात् एवपदं कर्मण्यतिव्या
प्तिवारणाय नित्यपदं सामान्यादावतिव्याप्तिवारणाय अनित्यपदं सामान्यतो गुणानुक्त्वा विशे
षतो गुणानां लक्षणार्थं विभजते रूपेत्यादिना चक्षुर्ग्राह्यतीति ननु चक्षुर्ग्राह्यति... त्वसंख्यायां गुणरूपायां
द्रव्यमात्रवृत्तित्वात् कुत्र न कथं चक्षुर्ग्राह्यतीत्यसंख्याप्रयोगः तस्मात्संख्या न गुण इति चेद् विशेषेति रे
वगुणः कथं चक्षुर्ग्राह्यति त्वमिति चेन्नैवं अत्र चक्षुर्ग्राह्यति प्राग्व्याप्यमेको यमेक इत्यापेक्षा बु
द्धिविशेषविषये निरूढलाक्षणिकत्वात् अयमेक इत्यादौ चैकत्वसंख्याया एकार्थसमवाये ने
वभाने सामान्यसदित्यादिवत् संख्यादीनां गुणत्वे रूपादीनां मिवासमवेतत्वे वृत्तिनित्यवृत्तिजा
ति... तत्र तेषु मध्ये रूपलक्षणमाह चक्षुर्मात्रेति संख्यादावतिव्याप्तिवारणाय मात्रपदं
गगग्राह्यत्वेऽ एतावद्गुणाय इदं प्रभायाः एकत्वेतिव्याप्तिवारणाय विशेषेति अत्र चातीन्द्रियरूपाव्याप्तिवारणाय च
दुर्ग्राह्यत्वप क्षुर्मात्रग्राह्यविशेषगुणवृत्तिगुणत्वव्याप्यजातिमत्त्वं रूपत्वं नीलत्वादिरूपावोधक व्याप्यजाति
नेनमनोग्रा मत्त्वं वाच्यं गुणत्वादिम... तया रसादावतिव्याप्तिवारणाय गुणत्वव्याप्येति रूपरसान्यतरत्वादि
तयानंसंभ रणाय जातीति ता दृग्जातिमत्त्वं रूपत्वं नीलत्वादिरूपावोधक चक्षुर्मात्रग्राह्यत्वस्य जाति विशेष
वृत्त्यादौऽति णत्वे मूलोक्तविशेषपदं वैयर्थ्यापत्तेः प्रभैकत्वव्याप्यजातिमत्त्वाभावात् त्वगग्राह्यत्वन्तु
प्तिवारणाय पिगुणवृत्तिजातिमत्त्वमिति ननु लघुलक्षणं बोध्यं पार्थिवजातिविशेषणं प्रयोजनम् मूलोक्तम् प्र
मात्रपदमिति मत्यमेव साधकं द्रव्येऽव्यभिचारवारणाय कल्प्यते कर्मादावव्यभिचारवारणायानित्यवृत्तीति जात्यादौ तद्वारणाय जातीति ।

राम

१८

सो१

यंमनोतिरिक्तद्रव्यत्वाभावेपिनक्षतिः पृथिव्यादिचतुष्टयान्यतमपरमाणोरेवादृष्टविशेषात्कृष्टस्पंदनेरिं
द्रियत्वसंभवात् नचतदादृष्टविशेषः स्पंदकत्वंस्यादितिवाच्यं अदृष्टविशेषस्यैवतस्यप्रतिबंधकत्वात्
सहकार्यंतरविरहाद्वा अतएवोक्तं भौतिकाएवपरमाणवोमनसीतिद्रव्यपदार्थानंतरंगुणप
दार्थंनिरूपयितुंद्रव्याश्रितत्वादिना गुणनिरूपणंद्रव्यनिरूपणाधीनमितिदर्शयति द्रव्याश्रितेति
अत्रद्रव्याश्रिताउक्तानीत्यनेनद्रव्यनिरूपणस्यासिद्धता दर्शिता गुणाश्रयत इत्यनेन गुणनिरूपणस्य
साध्यता तथाचसिद्धसाध्यसमभिव्याहारलभ्योत्रहेतुमद्भावः सिद्धस्यद्रव्यनिरूपणस्यहेतुतासा
ध्यस्यगुणनिरूपणस्यकार्यतेत्यर्थः यथामलिनैत्वेवपुःस्नायाः इत्यत्रसिद्धस्यवपुषोमलिनत्वस्यसा
ध्यस्नाने प्रतिहेतुताप्रतीयते तद्वत् गुणलक्षणमाह सामान्यवानिति जात्यादावतिव्याप्तिवारणा
यसामान्यवानिति समवायसंबंधेनजातिमत्त्वेसतीत्यर्थः तेनैकार्थसमवायादिना सामान्यादेरपिसो
मान्यवत्त्वान्नातिव्याप्तिः द्रव्येऽतिव्याप्तिवारणाय असमवायिकारणं नसमवायिकारणं असमवायि
कारणंसमवायिकारणभिन्नोद्रव्यभिन्नइत्यर्थः ननुपारिभाषिकेसमवायिकारणभिन्नेत्यर्थे तथा
चसत्यदृष्टादावव्याप्तिः असमवायिकारणवृत्तिसत्ताभिन्नजातिमदर्थकत्वेसामान्यादावतएवा
तिव्याप्तिनिरासेसामान्यवानितिपदवैयर्थ्यं तु असमवायिकारणवृत्तिजातिमदन्यार्थकत्वेपुनर
प्यदृष्टादावव्याप्तिः धर्मत्वादिजातिसत्त्वात् यदिचासमवायिकारणावृत्तिसत्तासाक्षाद्व्याप्यजाति
मत्त्वमर्थइत्युच्यते तदायद्यपि यथासन्निवेशेन वैयर्थ्यं तथापितदपेक्षयाद्रव्यभिन्नत्वस्याति
लघुत्वमिति विभावनीयं कर्मे [illegible] कर्मभिन्नइत्यर्थः गुणसामान्यस्य

यो॥

नीलकपालावच्छेदेन पीतबुद्धिं प्रति प्रतिबंधकांतरकल्पने गौरवात् लाघवात् पीतत्वादिकमेव स्वबो-
धं प्रति विधेयतावच्छेदकं मुक्तमित्यलं ग्रंथगौरवेण केचित्तु यदवच्छेदेन नीलरूपं तदवच्छेदेनाव-
यविनि नीलेतररूपं न जायते तथैव प्रतिबंधकताकल्पनात् अतो नीलकपालावच्छेदेन घटे नी-
लरूपं पीतावच्छेदेन च पीतमित्यव्याप्यवृत्त्य नेकरूपत्वमेव चित्रत्वमिति न चित्ररूपं प्रतिकार्य-
कारणभावांतरकल्पनमिति लाघवं अत एव लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः श्वेतः खुर-
विषाणाभ्यां स नीलो वृष उच्यते इत्यादौ एकस्यैवावयविनः अवच्छेदकभेदेनानेकरूप-
वत्ता श्रूयत इति वदंति एकैक छिन्नसुकुमारस्य र्शवदवयवारब्धे चित्रस्पर्शोपि बोध्यः अ-
न्यथा गजवपुषेन स्पार्शनविषयतानुपपत्तेः सुरभ्यसुरभिकपालारब्धघटस्तु निर्गंध एव षड्-
रसा हरीतकीति प्रतीतिस्तु अवयवरसविषयिणीति सांप्रदायिकाः वस्तुतस्तु चित्रस्पर्शे प्रमा-
णाभावः नैयायिकमते तु उद्भूतस्पर्शस्कंधस्पार्शने प्रतिहेतु लनास्तीति दर्शितं वायुवादे पाक-
जश्चेति नन्विदं कस्य लक्षणं पाकजरूपस्य चेत्पृथिवीवृत्तित्वलक्षणे तदा गंधादावतिव्याप्तिः
पृथिवीरूपस्य चेत्पाकजत्वे तदा आमघटीयरूपादावव्याप्तिः नचैवं पि व्याः पाकरूप-
वत्त्वे लक्षणमिति वाच्यं पृथिवीलक्षणस्य प्रकृतत्वात् पाकज उत्पन्ने न पृथिवीत्वं पूर्वमु-
क्तत्वादिति चेन्न पृथिवीरूपस्यैवात्र लक्ष्यत्वात् पाकजश्चेति चकारेणापाकजमपि समुच्यते
तथा चापाकजमात्रवृत्तिजातिमद्रूपत्वमित्यर्थः गुणत्वादिसत्त्वाद अतिभववारणाय मात्रप-
दं पाकजावृत्तीति पावत् आमरूपत्वादिधर्मवारणाय जातीति सामान्यादावतिव्याप्तिवारणाय

प्र०का०
१९

41

पृ०
१९

भात्ववारणायगुणवत्तीतिलक्षणांतरमाह पृथिव्यादीति पृथिवीवृत्तिजलवृत्तितेजोवृत्तिवृत्ति
वायुवृत्त्यवृत्तिद्रव्यत्वावृत्तिजातिमत्त्वमित्यर्थः तेनकस्यापिरूपस्यपृथि[illegible]दित्रयवृत्तित्वाभावेपि
नासंभवः अत्रविजातीयजलक्रियाजनकत्वावच्छेदक जलाग्निसंयोगनिष्ठवैजात्यवारणायपृथि
वीवृत्तिवृत्तीति तथापृथिवीतेजःसंयोगनिष्ठपाकजरूपादिजनकतावच्छेदकवैजात्यवारणायजल
वृत्तिवृत्तीति ताहृशजातिश्च रूपत्वमेव नचतत्रमानाभावः नीलतमत्वेनपाकजन्यनीलतमत्वेनैवा
वश्यंचाच्चकार्यकारणभावे रूपत्वस्यानवच्छेदकत्वादितिवाच्यं रूपंरूपमित्याद्यनुगतप्रतीतिसिद्धत्वे
वजातिसिद्धस्यैवजातिविघातस्यलाघवात् रूपपदशक्यतावच्छेदकतयातीन्द्रियरूपादावपि तत्स्वी
कारात् तदवांतरभेदानाह तच्चशुक्लेति शुक्लरक्तपीतहरितकपिशचित्रभेदात्सप्तविधमपि
त्यर्थः तत्रावयवशुक्लादिभिरवयवविनिर्मुक्तादिकेजन्यते चित्ररूपंप्रतीतिस्तुक्वचि दवयवानांचित्र
रूपंकारणं क्वचित्तुघटेरूपाभावः तर्हि पत्रनीलपीतावयवाभ्यांघटोजन्यते चित्ररूपंप्रतीतिस्तु
तत्रनीलावयवेनीलेतररूपेच रूपाभावः पीतावयवेचनीलरूपाभावइत्यवयवयोः षडभाववत्त्वा
नीलरूपंप्रतिनीलेतररूपत्वेनप्रतिबंधकत्वात् तथापीतादिरूपंप्रतिपीतादितररूपत्वेनप्र
ति बंधकतया तत्रावयविनिननीलंनवापीतमुत्पद्यते रूपत्वेनजन्यरूपत्वेनच कार्यकारणभा
वात् षडभावसहितेपिनवापि चित्ररूपमुत्पद्यते पृथिवीत्वेन चित्ररूपत्वेन तथात्वाद्य नचनीलरूप
एवावयवस्तु किंषडभावादीनां चित्ररूपहेतुत्वेनेतिवाच्यं तथासत्यवयविनोनीलरूपतयाप्रत्यक्षत्वे
नस्यात् नचरूपद्वयमेवा[illegible]यविनिमायां नीलत्वावच्छेदेन घटे पीतरूपोपलंभापत्तेः ८

गो·को·
८०

त्वादिवारणायजातीति पृथिवीरसंलक्षयति मधुरादीति मधुरलवणकटुकषायतिक्ताम्लरसाः षट् प्रा
मेवेत्यर्थः तिक्त्व निरसत्वव्याप्यजातिमत्त्वं पृथिवीरसलक्षणं बोध्यं एवेतिकपदस्थाने लक्षणादिप
दप्रक्षेपेणाखिलक्षणं बोध्यं तादृशजातिश्च पार्थिवभिन्नवृत्तित्वावच्छेदिका रसत्वातिः मधुरत्वं तु प्रापंपृ
थिवीरसे तेनजलरसेव्यतित्वान्नमधुरसत्वस्य साकल्ये पाकजस्यैति वकारेण पाकजस्यापि समुच्चयः
तेना पाकजमात्रवृत्तिजातिमत्त्वरसत्वं पृथिवीरसलक्षणमित्यर्थः जलीयरसवारणाय भूतेति
१६ असंभववारणायमात्र पार्थिववात्पर्थकं पार्थिवपाकजेमधुररसगृह्यमाणजातिघटितं सामान्यादि
वारणाय रसत्वपदं जलरसंलक्षयति अन्निवेति मधुरेऽपाकजरत्वेकं लक्षणं जलरूपातिव्याप्तिमधु
रपदं पार्थिवमधुरेतिव्याप्तिवारणायापाकजइति पाकजांतिमदर्थकं तेन न पार्थिवरसेतिव्याप्तिः
तादृशजातिश्चजन्यजलरसजनकतावच्छेदिकासर्वजलरसवृत्तिः जलरसस्य लक्षणांतरमाह नित्येति
त्यत्रे नित्यानित्यवृत्तिरसत्वव्याप्यजातिमत्त्वमर्थः तेनैकस्य नित्यत्वयोर्विरोधान्नासंभवः रसत्वगुण
त्वादिनातिव्याप्तिवारणाय रसत्वव्याप्येति नित्यानित्यरसयोः शब्दाय भेदंदर्शयति नित्येत्यादिना गंधल
क्षयति गंधइति रूपादावतिव्याप्तिवारणाय घ्राणेति गंधत्वादिजातावतिव्याप्तिवारणाय गुणइति घ्रा
णग्राह्यवृत्तिगुणत्वव्याप्यजातिमानित्यर्थः तेनातीन्द्रियगंधेनाव्याप्तिः रूपादावतिव्याप्तिवारणाय गु
णत्वव्याप्येति एतत्पदं विहाय स्पर्शवतीति पदप्रक्षेपेण पिलघुलक्षणांतरं बोध्यं लक्षणांतरमाह पृथि
वी३ वीमात्रेति पार्थिवैकवृत्तिजलवृत्त्यवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमित्यर्थः तेन न पृथिवीमा
त्रवृत्तिरूपादावतिव्याप्तिः शब्दादावतिव्याप्तिवारणाय वृत्त्यंतं रूपादावतिव्याप्तिवारणाय जलेत्यादि
पृथिवीत्ववारणाय गुणत्वेत्यादिनीलत्वेतिवारणाय साक्षादिति गुणत्वव्याप्यजात्यव्याप्येति तदर्थः

तरु

वतिट

नित्यत्वात्

रस
८

42

रूपत्वव्याप्या जातिः शुक्लभास्वरत्वादिरूपा तेजोरूपलक्षणमिति शुक्लेति भास्वरत्वं परप्रकाशकत्वं तेज
स्यातिव्याप्तिवारणाय शुक्लपदं जलरूपादिवारणाय भास्वरेति तेजोजन्यतावच्छेदकजातिविशेषावा
शुक्लभास्वरत्वे तेन न सुवर्णादिरूपाव्याप्तिः लक्षणान्तरमाह अपाकजमिति जलावृत्तित्वे सति पार्थि
९४ वावृत्तिजातिमद्रूपत्वमित्यर्थः जलरूपवारणाय सत्यन्तं आमघटादिरूपवारणाय जातिघटितं जल
रूपलक्षणमिति तदेवेति अक्षरलाघवाय व्युत्क्रमनिर्देशः तदेव पूर्वोक्तमेव लक्षणवाक्यं अभास्वरं भास्व
रपदरहितं अभास्वरपदवत्तदा शुक्लरूपं तल्लक्षणवाक्यमित्यर्थः यथाश्रुते पूर्वोक्तशुक्लभास्वरस्या
पाकजस्य तेजसरूपस्याभास्वरत्वे जलवृत्तित्वेन विरुद्धमित्यसंगतं स्यात् तथा च शुक्लमभास्वर
मपाकजमिति जलरूपलक्षणं पर्यवसन्नं आत्मादावतिव्याप्तिवारणाय शुक्लमिति तेजोरूपवा
रणायाभास्वरमिति पार्थिवशुक्लरूपवारणायापाकजमिति पार्थिवावृत्तिजातिमदित्यर्थः तेनामपा
र्थिवशुक्लरूपे नातिव्याप्तिः तादृशजातिश्च जन्यजलजनकतावच्छेदिका सकलजलरूपवृत्तिः
जलीयशरीरस्यापि शुक्लरूपयोगित्वात् रसं लक्षयति रसेति रसनेन्द्रियग्राह्यो रसत्वादवृत्तिवाह
अत्र विशेषगुण इति गुणविशेषो गुणत्वव्याप्यजातिमानित्यर्थः तथा च रसनेन्द्रियग्राह्यवृत्तिगुणत्व
व्याप्यजातिमत्त्वमित्यर्थः तेनातीन्द्रियरसेनाव्याप्तिः विशेषपदस्य नवे पर्यं क्वचित्पुस्तके तु विशेष
गुणशून्यः पाठः रसनेन्द्रियग्राह्यवृत्तिरूपावृत्तिजातिमत्त्वं रसत्वमित्यादि लघुलक्षणं तदं बोध्यं लक्ष
णान्तरमाह पृथिवीति पृथिवीवृत्तिजलवृत्तिवृत्तितेजोऽवृत्तिगुरुत्वावृत्तिजातिमत्त्वमित्यर्थः ते
नैकस्याविरसस्य पृथिवीजलोभयवृत्तित्वाभावेऽपि न क्षतिः [illegible] वारणाय [illegible] तेगंधवार

णाय द्वितीयं स्पर्शादिवारणाय तेजरसादि गुरुत्वातिव्याप्तिवारणाय गुरुत्वेत्यादि तेजसान्यरूप

गो॰ कों॰ ८१

णापसंबंधेत्यंतं रूपादावतिव्याप्तिवारणाय द्रव्यांतं वेगत्वसंख्यात्वगुणत्वकर्मत्वादिवारणाय मन इत्यादि
न्यद्रव्यवृत्तिगुणत्वादिरूपधर्मवारणाय जातीति अवांतरभेदानाह सर्वेति शीतेत्यादि दुःखनियतरो
मांचकम्पादिजनकस्पर्शत्वं शीतत्वं कामिनीकामुकस्य शीतेति व्याप्तिवारणाय दुःखनियतेति दुःखनि
यतस्वेददाहादिजनकस्पर्शत्वमुष्णत्वं दुःखेति पदव्यावृत्तिः पूर्ववत् अपाकजेति स्पर्शपदं अदृष्टादावति
व्याप्तिवारणाय तदुभयभिन्नस्पर्शत्वं अनुष्णाशीतस्पर्शत्वं घटादावतिव्याप्तिवारणाय स्पर्शपदं अप
(वारणाय पदं) कृष्टादावतिव्याप्तिः शीतत्वादिजातयो लक्ष्यतावच्छेदकविधया आश्रयभेदेनापि लक्षयति शीते
ति पयसीति पयोवृत्तिस्पर्शत्वं शीतत्वमित्यर्थः रूपादावतिव्याप्तिवारणाय स्पर्शपदं एवं क्रमेणोष्ण
स्पर्शस्यापि लक्षणं बोध्यं पृथिवीवाय्वोरिति पृथिवीवायुस्पर्शान्यतरवृत्तिजलस्पर्शावृत्तिजातिम
त्त्वमित्यर्थः रूपादावतिव्याप्तिवारणाय वृत्त्यंतं पृथिवीवायुस्पर्शसाधारणस्यैकस्यानुष्णाशीतत्व
स्य जातित्वे विवादात् संभववारणाय अन्यतरेति स्पर्शत्वगुणत्वादिवारणाय जलेत्यादि ता दृशं च जा
तिद्वयं एका पृथिवीजन्यतावच्छेदिका अन्या च जन्यवायवीयस्पर्शजनकतावच्छेदिका वायुपरमा
णुस्पर्शसाधारणी जातिः प्रसंगाद्रूपादीनां चतुर्णां प्रत्यक्षत्वातीन्द्रियत्वव्यवस्थामाह उद्भूतेति महत्
त्वेति महत्त्वसमवायिनि समवेतत्त्वे सतीत्यर्थः तेन परमाणुद्व्यणुकरूपादीनामतीन्द्रियत्वे तत्र
समवायिनि परमाण्वादौ महत्त्वस्य समवायाभावात् त्रसरेणुस्पर्शस्य तु महत्त्वैकार्थसमवायसत्त्वेपि अतीं
द्रियत्वं प्रतिबंधकसद्भावात् उद्भूत इति उद्भूतत्वं जातिविशेषः अनुद्भूतत्वजात्यभावो वा तच्च प्रत्यक्ष
त्वप्रयोजकं तेन चक्षुरादिरूपादीनां न प्रत्यक्षत्वं दीधितिकृतस्तु अनुद्भूतरूपादौ मानाभावः रूपा
दौ साध्ये पृथिवीत्वादेः प्रयोजकत्वात् लाघवाच्चक्षुरादेर्नीरूपत्वमेव विषयतारंभे परमाणूनां नीरू

43 ९ गाम ८१

तार

ताहशजातिर्गंधत्वं तद्वांतरभेदं दर्शयति सुरभिरिति सुखविशेषजनकीभूतसाक्षात्कारविषयगं
धत्वं सुरभित्वं दुःखविशेषजनकीभूतसाक्षात्कारविषयगंधत्वमसुरभित्वं असुरभिधूमादिगंध
ग्रहे कस्यचित् सुखोत्पत्तेः सुरभिहिंगुगंधादिगंधग्रहे दुःखोत्पत्तेश्चातिव्याप्तिवारणाय लक्षणद्वये विशे
षपदं चंद्रसूर्यादिस्पार्शनानां सुखदुःखाविशेषजनकत्वादि तथापि लक्षणद्वये गंधपदं सुरभि
त्वमसुरभित्वं जातिविशेषो वा ननु गंधस्य पृथिवीमात्रवृत्तित्वं कथं नूतनम्... दिस्थले सौरभ हृदय
प्रतीतेः तथा पुरातनकूपोदकादौ दुर्गंधस्याप्युपलंभात् इत्यत आह जलादाविति संपृक्ते जलसंपृक्ते
पार्थिवावयवे गंधसमवायात् लोहितस्फटिकइत्यादिवदौपाधिकप्रत्यय इति भावः पृथिवीत्वे
न गंधत्वेनैककार्यकारणभावकल्पनात् कालांतरे पार्थिवावयवापगमे तस्य जलस्यानिर्गंधताप्र
तीतेश्च न च रसेप्येवमस्त्विति वाच्यं घनमुक्तजलादौ पार्थिवसंबंधाभावेपि मधुररसप्रतीतेः
लवणरसस्तु तस्यौपाधिकः समुद्रमध्यमेघनमुक्तानां पार्थिवावयवापगमे क्षाररसाभावोपल
ब्धेः स्पर्शं लक्षयति स्पर्शइति तत्रचक्षुर्ग्राह्यत्वे सतीति विशेषणीयं तेन न संख्यादावतिव्याप्तिः
विशेषगुणा इति पाठः त्वगिंद्रियमात्रेति पाठांतरे वा एतद्विशेषणं नोपादेयं बुद्ध्यादावतिव्याप्तिस्त्व दाय
गिंद्रियेति स्पर्शत्वजातावतिव्याप्तेर्गुण इति चक्षुर्ग्राह्यत्वग्ग्राह्यवृत्ति गुणत्वव्याप्यजातिम
त्त्वमर्थः तेन नातींद्रियस्पर्शाव्याप्तिः चक्षुर्ग्राह्यत्वग्ग्राह्यजातिमत्त्वं वा लघुलक्षणं बोध्यं लक्ष
णांतरमाह पृथिव्यादीति स्वसमवायिसमवायसंबंधेन पृथिव्यादिचतुष्टयवृत्तिमनोवृत्तित्वावतिर
भाववज्जातिमित्यर्थः तेन कस्यापि स्पर्शस्य चतुष्टयवृत्तित्वाभावात् असंभवः असंभववार
मतं

रण त्रित्वादिव्याप्यत्वाघाघवदिति तथा चैकाव्यक्तिव्याप्यत्वाभावान्नातिव्याप्तिः एकपृथक्त्वापतिव्याप्तिवा
रणाय संख्येति एवं त्रित्वभूत्पचतित्वसत्पनेकवृत्तिसंख्यात्वं द्वित्वमित्यादिक्रमेण लक्षणान्यूह्यानि त्रित्वाप्र
तिव्याप्तिवारणाय सत्यंतं एकत्ववारणायानेकेति परार्द्धपर्यंतेति परार्द्धातिरिक्तसंख्यानास्तीत्यत्र पुराणादि
कमेव प्रमाणं तथा च विष्णुपुराणे एकं दश शतं चैव सहस्रमयुतं तथा लक्षं च प्रयुतं चैव कोटिरर्बुदमे
व च वृंदखर्वौ निखर्वशंखपद्मसागराः अंत्यं मध्यं परार्द्धं च दशवृद्ध्या यथाक्रमम् इति परार्द्धत्व
लक्षणं च संख्याव्यक्त्यंतराव्याप्यसंख्यात्वं स्वभिन्नसंख्यासमाने: तिव्याप्तेरव्याप्तं एकत्वेनरूपेण एके
त्वव्याप्यत्वादसंभववारणाय व्यक्तिपदं स्वस्यापि स्वव्याप्यत्वादसंभववारणाय अंतरपदं स्वभिन्नार्थ
कं आकाशादावतिव्याप्तेः संख्येति सर्वासामेव संख्यानां समानाधिकरणाधिकव्यक्तिवृत्तिसंख्यांत
रव्याप्यत्वात् परार्द्धेपेक्षया अधिकव्यक्तिवृत्तिसंख्यांतराभावात् लक्षणसमन्वयः एकत्वं लक्षयति ।
नित्येति अनित्यमात्रवृत्तिजातिमत्संख्यात्वमेकत्वमित्यर्थः द्वित्वादिवारणाय भूतांतं असंभ
ववारणाय मात्रेति नित्यानित्यैकत्वयोरधिकरणव्यवस्थामाह नित्यगतमित्यादिना अनित्यैकत्वस्य
लक्षणांतरमाह स्वाश्रयेति कारणैकार्थप्रत्यासत्त्या एकत्वासमवायिकारणकत्वमित्यर्थः कार्यैका
र्थप्रत्यासत्त्यैकत्वासमवायिकारणकद्वित्वादिवारणाय कारणैकेत्यादि द्व्यणुकपरिमाणद्वि
त्वासमवायिकारणकद्व्यणुकपरिमाणवारणायैकत्वेति एतेन सत्त्वापत्तिवान्नानुगमः द्वित्वं
लक्षयति द्वित्वं चेति अनित्यमेवेत्येवकारोऽवधारणार्थः तेनानैकत्वातिव्याप्तिः तेनानित्यसंख्या
मात्रवृत्तित्वाघवृत्तिजातिमत्त्वं तत्त्वं यत्त्वादिवारणाय संख्यापदं त्रित्वचतुष्ट्ववारणाय त्रित्वत्वादि
अनेकत्वसंख्यालक्षणं तु व्यासज्यवृत्तिसंख्यात्वं संयोगादिवारणाय संख्येति एकत्ववारणाय

नै॰ कौ॰
८२

नि४

न्यू
८२

पत्वात् अनियतारंभे च गुणादीनां प्रतिबंधकत्वादिति वदंति इदमुपलक्षणं अनतिप्रसक्तस्यापि बोध्यं तेन न सुव
र्णरूपस्य प्रत्यक्षता संख्यां लक्षयति संख्येति एकादीति व्यवह्रियते हेतोनोपानादि कं क्रियते अनेनेति व्यव
हारः प्रत्ययस्तस्याश्च विषयतया एकोनेक इत्यादि प्रत्ययस्य तत्र हेतुर्गुणः संख्येत्यर्थः ताहृशप्रत्ययत्वकार
णाहृष्टादावतिव्याप्तिवारणाय विषयतयेति हेतुपदस्थाने विषये पदप्रक्षेपो वा एकोनेको द्वौ त्रय इ
त्यादि प्रत्ययतारगम्येकत्वप्रापादाने अन्यत्राव्याप्तिवारणाय समुदायपदोपादाने असंभववारणाय
च इत्यन्यतमपदं अयमेको घट इत्यादौ घटादेरपि विषयत्वादतिव्याप्तिवारणाय गुण इति अपव
मबुद्धिपते ज्ञायते अनेनेति व्यवहारः शब्दः तथा चैकत्वादिषूदन्यतमप्रवृत्तिनिमित्तत्वं संख्या
त्वमित्यर्थः अन्यतमप्रयोजनं पूर्ववत् एकपदप्रवृत्तिनिमित्तमेकत्वं द्विपदप्रवृत्तिनिमित्तं द्वित्वमित्या
दिक्रमेण बोध्यं प्रवृत्तिनिमित्तं च वाच्यत्वे सति वाच्यवृत्तित्वे सति वाच्योपस्थितिप्रकारत्वं आकाश
वतिव्याप्तिवारणाय वाच्यवृत्तित्व इति शब्दाश्रयत्वादावतिव्याप्तिवारणाय वाच्यत्वेति दण्डितदा
रणा वाच्योपस्थितीति यद्वा एकादीत्यस्य गणितत्वमित्यर्थः तेन गणितपदप्रवृत्तिनिमित्तं सं
ख्यात्याचार्याः लक्षणांतरमाह सामान्येति स्वसमवायिसमवायेन सकलद्रव्यवृत्तिपरिमाणाद्यवृत्ति
धर्मवत्त्वमित्यर्थः असंभववारणाय स्वत्वादिरूपत्वादिवारणाय सकलेति असंभववारणाय द्रव्ये
ति परिमाणत्वगुणत्वादिवारणाय परिमाणेत्यादि अवांतरभेदमाह एकत्वादीति आदिपदा
द्द्वित्वादिपरिग्रहः एकपदप्रवृत्तिनिमित्तम[illegible]त्वमेकत्वं स्वसमानाधिकरणयावत्संख्याव्याप्तिव्याप्य
संख्यात्वं वा घटैकत्वस्य पटै[illegible]कत्वाव्याप्यत्वात् समानाधिकरणानंदित्वादौ देरपि समानाधिक

त

कौ०
८४

तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वमिति पूर्वं व हुच्चं उक्तसिद्धसंबंधरूपा प्राप्तिः पूर्वा का प्राप्तिरिति लक्षणं तु पूर्व
मेव व्याख्यातं घटासमवायिकारणत्वव्याप्य कर्मगुणत्वव्याप्यजातिमत्त्वं संयोगत्वमित्यादिरीत्यापि
लक्षणीयं लक्षणांतरमाह अप्राप्तयोरिति व्यासज्यवृत्तिरित्यर्थः समवायेन प्रत्यक्षवृत्तित्वे सति पर्या
प्ताख्यस्वरूपसंबंधेनोभयाश्रितत्वमेव नैकाश्रितत्वं संयोगस्येत्यर्थः इदं च यद्यपि द्वित्वादिसंख्या
पाप्यप्यस्ति तथापि व्यासज्यमात्रवृत्तिविभागावृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वे बोध्यं संख्या
त्वादिवारणाय मात्रपदं रूपत्वादिवारणाय वृत्त्यंतं विभागत्ववारणाय विभागेत्यादि गुणत्वेति
द्वित्ववारणाय लक्षणांतरमाह अप्राप्तेति जन्यद्रव्यवृत्तित्वे सति स्वसमानाधिकरणाभावप्रतियो
गिविभागभिन्नगुणत्वमित्यर्थः कालादिवारणाय सत्यंतं रूपादिवारणाय स्वेत्यादि विभाग
वारणाय भिन्नांतं घटादिवारणाय गुणपदं अवांतरभेदानाह स चेति अन्यतरेति क्रियाप्रागभाव
वत्समवेतत्वे सति क्रियावत्समवेतत्वे संयोगत्वं अन्यतरकर्मजसंयोगत्वं उभयकर्मजेति
प्रागाद्वारणाय सत्यंतं संयोगजसंयोगवारणाय क्रियेत्यादि तादृशविभागवारणाय संयोगेति
स्वजनकक्रियाभाववदसमवेतसंयोगत्वमुभयकर्मज संयोगत्वं कंपमानशाखादोषेण क्रि
यामात्रजन्यसंयोगेऽतिव्याप्तिवारणाय स्वजनकेत्यादि कर्मजन्यसंयोगत्वं संयोगजसंयोगत्वं
एवं रूपेण वैविध्यं अन्यथा कर्मजन्यसंयोगजन्यतावच्छेदकजातिद्वयवत्त्वात् द्वैविध्यमेव
स्यात् उभयकर्मजस्थले कर्मत्वेनैव कारणतात् उभयत्वादिकं तु न कार्यनिष्ठवैजात्यनियामकं
किं तु अर्थसमाजः अन्यथोभयदंडजघटादावपि वैजात्यापत्तिः कारणाकारणेति अत्र कारणं

45

राम
८४

रणं तस्याप्यवयवस्य तूलस्यस्य समवायिकारणम् तन्तूनां प्रचयाख्यो प्रशिथिलः संयोगः अवयवइत्यर्थः प्रशिथि
लत्वं संयोगत्वावान्तरजातिविशेषः तज्जातिमिति तज्जातिमित्यर्थः नित्यपरिमाणं दर्शयति परमा
णिवति अत्र परमाणुपदेन मनसो विग्रहणं परममहत्परिमाणस्याप्यं दर्शयति आकाशादिति आदिपदा
त्कालदिगात्मग्रहः नित्यमेवेत्य चकारो भिन्नक्रमः परमाणुपरिमाणं परममहत्परिमाणं चेति द्वय
मेव नित्यमित्यर्थः तेन त्रुटेरेव विभक्तानि इति त्रुटिमहत्वस्यापि नित्यमिति मनच्छेदः पृथक्त्वलक्ष
यति पृथक्त्वमिति पूर्वोक्तरीत्या पंचम न पृथगित्यादिज्ञानविषयवृत्तिगुणत्वव्याप्यजातिमत्वेलक्ष
णंपदव्यावृत्तिः पूर्ववत् एतेन पृथक्त्वे प्रमाणमपि दर्शितं तेन याहि पृथक्त्वस्य गुणस्य नान्योन्याभा
वेनगतार्थता घटः पटात् पृथगिति प्रतीतेः सावधिक निरवधिक पदार्थविषयतया भिन्नवि
षयत्वादिति साम्प्रदायिकाः एकदेशिनस्तु अत्र पंचम्या उपपदविभक्तेः प्रयोगसाधुत्वार्थं प्रतियोगि
तार्थकत्वं वा घटप्रतियोगिक भेदाश्रयो घट इत्यर्थः घटः पटान्न इत्यत्र नामार्थयो भेदो वस्थापक
विभक्ते स्तंत्रत्व मित्यव्ययनिपातातिरिक्ते निविशेषणान्तस्पंचम्यपदात् तस्मादन्योन्याभावस्य पृथक्त्वं
ऽन्न एव घटाद्रूपं पृथगित्यादि गुणादिषु पृथक्त्व प्रतीति विशेषवदभिन्नतामपुपपद्यते इत्तिवदंति
नदवान्तरभेदानाह तच्चेति द्विपृथक्त्वादिकमिति व्यासज्यवृत्तिपृथक्त्वमनित्यमित्यर्थः तेन त्रिपृ
थक्त्वादीनामपि संग्रहः एकत्ववन्नानमिति नित्यानां परमाण्वाकाशादीनामेकपृथक्त्वं नित्यं जन्यानां
कारणगतैकपृथक्त्व समवायिकारणकमित्यर्थः द्वित्ववदिति द्विपृथक्त्वस्य पिंडद्वयसमवायिका
रणं तदुत्ते कपृथक्त्वे असमवायिकारणं अपेक्षाबुद्धिर्निमित्तं अपेक्षाबुद्धिविनाशाद् द्विपृथक्त्वनाश इ
त्यर्थः एवं पृथक्त्वादावप्यु द्वितीयं संयोगं ... इति संयुक्तमिति अनेन नदसंयुक्तमिति प्रतीतिविषयच

टी

ना४

तु आद्येषु कर्मसु असमवायिकारणस्य नोदनरूपधनुर्गुणेषुसंयोगस्य नष्टत्वात् अगत्या कर्मजन्यवेगस्य कर्मांतरा
ज्ञो० समवायिकारणत्वं स्वीक्रियते नदुःख आद्यनोदनादाद्यमिषोः कर्मतत्कारितात्त्ववेगादुत्तरोत्तरं कर्मतिवेग
८७ जन्यतावच्छेदकं कर्मनिष्ठवैजात्यं हि तैयाद्यपतने विनिगमनाविरहादुभयमपि हेतुर्वैजात्यमेक र आद्य
पतने गुरुत्वादिजन्यतावच्छेदिकायाजातेः द्वित्रादिकर्मणि वेगजन्यतावच्छेदिकायाजातेःसत्त्वात्
एकत्र द्वितीयपतनादौ संकीर्णत्वात् तस्मान्न वेगस्य पतनासमवायिकारणत्वमिति यथाश्रुतमेव रम्यं
सुधीभिरालोचनीयं कश्चिन्मूलपुस्तके आद्यपतनेतिपाठः आद्यपतनयोः पृथिवीजलयोः पतनमित्यर्थः
तेनतेजःपतननिरासः पतनसमवायिकारणद्रव्यवृत्तिव्याप्यैतरसमवायीति पतनासमवायिकारणवृत्तिगुण
त्वव्याप्यजातिमत्त्वमित्यर्थः तेन क्वापि अप्रवृत्ततस्योत्पन्नविनष्टस्य घटादेर्गुरुत्वेनाव्याप्तिः लक्षणांतर
त्य माह पृथिवीति पृथिवीवृत्तित्वे सति जलवृत्ति[illegible] रसावृत्तिजातिमत्त्वमित्यर्थः स्नेहेतिव्याप्तिवारणाय तिवृत्तितेजोव
दृष्टिवेत्यादि गंधवारणाय जलेत्यादि रूपत्वादिवारणाय तेजइति रसत्ववारणाय रसेति यद्वा लक्ष
णद्वयं तत्राद्ये पृथिवीवृत्तित्वे सति प्रत्यक्षावृत्ति गुणोमात्रव्याप्यजातिमत्त्वमित्येकं पृथिवीपदस्थाने ज त्व
लपदप्रक्षेपात् द्वितीयं अप्रत्यक्षत्वादिवारणाय गुणत्वं तु रूपत्वादिवारणाय प्रत्यक्षेत्यादि स्थितिस्थापक
वारणाय जात्यादिति पूर्वं निरुक्तार्थे स्थितिस्थापकस्यापत्तिरित्यत्वादतएव गुरुत्वधर्मधर्मिभाव
नाहि आद्याः क्रियाइति भाववापदेनात्र स्थितिस्थापकाप्रक्रियाद्वारत्याचार्याः गुरुत्वस्य पतनासमवायि एम
कारणत्वे [illegible] पातसिद्धांतमितितदर्शयति यथा फलमिति वैशेषिकस्वीकृतेतिशेषः गुरुत्वसत्त्वेपि पतना ८७
भाव दर्शनात् अन्वय व्यभिचारस्य वारणाय प्रतिबंधकाभावानां सहकारित्वं दर्शयति संयोगेत्यादिना
वृक्षगुरुणा सफलानां वृंतसंयोगस्य पतनप्रतिबंधकत्वात् पक्वत्वादशायां तदभावे सति

कालिकपरत्वोत्पत्तिं दर्शयति ॥ अपेक्षेति ॥ अत्र च परत्वापरत्वयोर्विनाशकारणं सहधावाच्यं तदुक्तमाचार्यैः
अपेक्षाबुद्धिसंयोगद्रव्यनाशाः पृथक् पृथक् द्वाभ्यां द्वाभ्यां च सर्वेभ्यो विनाशः सप्तधा तयोः ॥ अपेक्षाबु
द्धिनाशात् परत्वादिनाश इत्येकः प्रकारः ॥ संयोगनाशादिति द्वितीयः ॥ संयोगनाशश्च त्रिविधः परत्वाधा
रभूतपिंडस्य तद्दिक्संयोगनाशात्परत्वनाशः ॥ एवं तदपेक्षया परत्वाश्रयस्य तद्दिक्संयोगनाशाद
पि परत्वनाशः ॥ तथावधिभूतस्य द्रव्यस्य देशद्वेश संयोगनाशादपि परत्वनाश इति त्रिधा संयोगनाशः ॥ एवं पर
त्वाश्रयीभूतद्रव्यनाशादपि परत्वनाश इति तृतीयः ॥ अपेक्षाबुद्धिनाशद्रव्यनाशाभ्यामिति चतुर्थः ॥ संयो
गनाशद्रव्यनाशाभ्यामिति पंचमः ॥ अपेक्षाबुद्धिनाशसंयोगनाशाभ्यामिति षष्ठः ॥ द्वाभ्यां चेति चकारेण तत्ती
पश्चाद्विनाशद्वयस्य समुच्चयः ॥ अपेक्षाबुद्धिनाशसंयोगनाशद्रव्यनाशेभ्य इति सप्तमः ॥ प्रत्येकं नाशकत्वाभि
लितस्थले सर्वेषामेव हेतुत्वात् ॥ एवं च संयोगस्याधिके द्वैविध्ये सह परत्वादिनाशकानां नवविधत्वं वोध्यं
एतेषां च परस्परासंकीर्णस्थलानयनप्रक्रिया गुणकिरणावलीलीलावत्योरनुसंधेया ॥ ग्रंथगौरवभयान्ने
ह प्रपंच्यते गुरुत्वं लक्षयति गुरुत्वमिति पतनेति कपालसंयोगादावतिव्याप्तेः ॥ पतनपदं प्रथमपिंडस्य
संयोगानुकूलक्रियात्वमेव पतनत्वं तादृशी च क्रिया गुरुत्वाभाववति तेजस्यपि वर्तते शिरसि सूर्यकिरणाः
पतंतीति प्रयोगाच्च ॥ पततीत्यादिव्यवहारात् तथा च तेजः ॥ पतनासमवायिकारणे ॥ अदृष्टवदात्मसंयोगादा
वतिव्याप्तिः तथापि गुरुत्वजन्यतावच्छेदकजात्यवच्छिन्नसुवर्णादिपतनविशेषो न विवक्षितः ॥ अत्र हि वति
तीयादिपतनमात्रं च तत्कारितवेगसमवायिकारणत्वात् वेगः ॥ तिव्याप्तिवारणाय आद्यत्वेन पतनं विशेष
णीयमिति कश्चित् वस्तुतस्तु द्वितीयादिपतनेपि गुरुत्वस्यैवासमवायिकारणत्वं तेजोवर्तिविलक्षणपतनत्वा
वच्छिन्नं प्रति लाघवेन तस्यैव हेतुत्वात् [illegible] इच्छादिकमेस्थले

चयः । ध्वंसस्यापि द्वितीयक्षणे नाशस्तत्रार्थ; अत्र हेतुगर्भविशेषणमाह त्रिक्षणावस्थायितेति यत्र तस्य स्वो
त्पत्तिक्षणावधिकतृतीयक्षणवृत्तित्वं नास्ति उत्पन्नः स्वोत्पत्ति द्वितीयक्षणोत्पत्तिकनाशस्य द्वितीयतृतीय
क्षणेऽसत्त्वं संभवतीत्यर्थः । एतादृशो नाशोऽन्त्यनाशस्य नाशजनकनाशसंभवादिति अत्र कार्यकालवृत्तित्व
पाकारणत्वं नास्तीति दर्शयितुं तृतीयपदं कार्यपूर्वकालवृत्तितया कारणत्वापत्त्यसंभवतीति द्योतनाय
द्वितीयपदं एतत्फक्किकोक्तस्या बाधकं स्वयं प्रदर्शितं गोवर्द्धनधर्मबीजं तस्मा दुपपत्तेतितच्चा
त्यस्यापि द्वितक्षणावस्थायित्वमिति भावः । वस्तुतस्तु ध्वंसपक्षवृत्तिनाशो प्रतियोगिध्वंसनाशत्वेन हेतु
त्वापत्तेः यालाघवात् ध्वंसत्वेनैव हेतुत्वमुचितं न चान्त्यशब्दस्य क्षणिकत्वापत्तिरेव दोष इति
वाच्यं क्रमहान्यतानापाकमयसंभवेन यत्र तत्र दार्शनिकमित्याद्यनुमानानां प्रयोजकतया जगते ।
क्षणभंगुरत्वं नाङ्गीक्रियते । ध्वंसशब्दस्य तु विनाशसामग्रीसमवहितत्वात्यन्त्यस्य क्षणिकत्वे बाधका
भावादित्यत्र मतुरवादे स्वयि बोध्यं ननु स एवायं गकार इति प्रत्यभिज्ञानाभिन्नः शब्दः श्रावणप्रत्य
क्षविषयत्वात् शब्दत्वादित्याद्यनुमानान्नो शब्दस्य नित्यत्वमेवेति मीमांसकादयः तत्कथमिह
शब्दस्य नाशः प्रतियोगित्वं इत्यत आह विनाशित्वं चेति अनुमानमेव दर्शयति । अनित्यत्वमिति अप्रा
नां सुखबोधार्थं साध्यादिकं विवरणोति शब्दस्यानित्यत्वमित्यादिना अनित्यत्वं चेति नाशप्रतियो
गित्वमेवास्ति त्वं न तु नाशप्रतियोगित्वं गौरवात् प्रागभाव अव्याप्तेश्चेति हेतुविशेषणानां राम
प्रयोजनं निदर्शयति प्रत्यक्षत्वादित्युच्यमानइति तेनैवात्मनैवेत्यर्थः योगिनां इंद्रियेति यो ८१
गजधर्मस्य सर्वेन्द्रियप्रत्यासत्तित्वादिति भावः अस्मदादीति प्रत्यक्षपदस्य लौकिकप्रत्यक्षपर ८२
त्वे तात्पर्यं ग्राहकं तेनास्मदादीनां सामान्यलक्षणप्रत्यासत्त्या जन्यप्रत्यक्षविषयत्वेपि अप्रा

कत्वादत एव पूर्वमुक्तं क्रियादिसंयोगांतानां चतुर्णां [illegible] धाभिमानो न स्यादिति तथा च शब्दस्या
पेक्षाबुद्धिभि[illegible]न्नबुद्धेरिवायाः कर्मणश्च लक्षण[illegible] त्रयावृत्तित्वं साधर्म्यमित्यर्थः जन्यकृतेरप्यत्र
त्त्वेन बोध्यं यद्यपि द्वेकपालद्वयसंयोगनाशकालोत्पन्नघटसंयोगादावतिव्यापकं तथापि
अपेक्षाबुद्धिभिन्नत्रिक्षणावृत्तिजन्यावृत्तिजातिमत्वं बोध्यं ज्ञानत्वसंग्रहाय अपेक्षाबुद्धिभिन्ने
ति असंभववारणाय त्रिक्षणावृत्तीति नित्येश्वरज्ञानादिवृत्तिज्ञानत्वादिसंग्रहाय जन्येपदं
घटादिवारणाय सत्यंतं सामान्यादिवारणाय जातीति तन्नाशकप्रकारं दर्शयति त
त्रेति तेषां मध्य इत्यर्थः कार्यशब्द इति स्वकार्योपि शब्दः तज्जन्यनाशप्रतियोगी नहीत्य
र्थः स्वकार्यस्य च शब्दस्य स्वद्वितीयक्षण एवोत्पत्तिः तदनंतरमेव शब्देन स्वस्य नाशः अप
क्षणीयांतराभावादिति लक्षणद्वयमाद्यावस्थायित्वमाद्यमध्यमशब्दानामिति भावः अंत्य
भिन्नशब्दानामेव द्विक्षणावस्थायित्वं अंत्यस्य तु नाशकस्य बहितस्यैवोत्पत्तेः क्षणिक
त्वमिति प्राचीनमतं दर्शयति अंत्यस्त्विति सुंदोपसुंदौ नाम द्वावसुरौ परस्परप्रहारवशा
देकदैव विनष्टौ तद्वत् अंत्योपांत्यशब्दावपि मिथो विनाशकत्वादेकदैव नष्ट इत्यर्थः एतन्म
ते चरमशब्दस्य बोद्धा निमित्त लक्षणत्वापत्तिस्तथा चैत दृष्टांतेन न्यायापित्त [illegible] स्यादिति
उपांत्यनाशस्यैवांत्यनाशकत्वादंत्यस्यापि द्विक्षणावस्थायित्वमिति दर्शयति तद्युक्तमि
[illegible]त्यादिना अत्रापि त्रिक्षणावस्थायित्वमित्यादिं नेति वकारशून्यः पाठः वकारपाठे तु
पूर्वोक्त एवार्थः अत्र चैवमन्वयः अंत्यस्य द्विक्षण[illegible]मिना द्वितीयक्षणानुपपत्तेः इति तिं स
मुच्चयं [illegible] द्वितीयचेति चकारेण द्वितीयक्षणस्थायित्वमु
पपन्नं [illegible] प्रथमक्षणावृत्तिनेत्यर्थः ॥ २४

मेवेतिवाच्यं कालावच्छिन्नप्रत्यक्षत्वं प्रत्यक्षावच्छिन्नकालावच्छेदक इति विनिगमनाविरहात् गुरुतर
कार्यकारणभावद्वयापत्तेः प्रत्यक्षत्वानिवेशे च कालावच्छिन्नात्मशब्दादौ व्यभिचार इति दिक् ननु घ्र
द्व्यणुकस्य नित्यत्वसाधकहेतौ योगिप्रत्यक्षविषयत्वघटितात्मादौ व्यभिचारवारणाय अस्मदादिपदं तदा स
मर्थं भवेद्यदि तदा योगजधर्मवशात् अतीन्द्रियादिकं कश्चित्प्रत्यक्षं तत्र प्रमाणाभाव इत्यत आह ; प्रमेयो
तरगं तत्र प्रमाणं दर्शयति किंपुनरित्यादिना परमाणवइति अत्र प्रत्यक्षत्वे सामान्यलक्षणाज्ञान
लक्षणप्रत्यासत्त्यजन्यत्वं तेन नास्मदादीनां सामान्यलक्षणादिजन्यप्रत्यक्षविषयतया अप्रयोजनं
तथापीश्वरप्रत्यक्षविषयतयार्थान्तरवारणाय कस्यचिदिति जन्यज्ञानवत इत्यर्थः पक्षधर्मताव
लव्याप्तिसिद्धिं दर्शयति पश्यति ननु योगिनामतीन्द्रियार्थविषयकप्रत्यक्षवत्त्वं तः ज्ञाति[illegible]
त्व अस्मदादिवदिति योगिप्रत्यक्षं नातीन्द्रियविषयकं प्रत्यक्षत्वादस्मदादिप्रत्यक्षवदित्यादिमीमां
सकोद्भावितानुमानानां कागतिः नैरीश्वरानेकान्तिकत्वात् तु ईश्वरप्रत्यक्षे तेन व्यभिचार इति चेन्मीमांसा
गुरवो न मीमांसामिश्राः प्राणित्वादस्मदादिवन्मीमांसकवेद्धि नैवेदार्थविवेचिकाबुद्धित्वात्प्रमा
दिबुद्धिवदित्याद्यनुमानानां या गतिः सात्राप्यस्ति तेषामप्रयोजकत्वमिति चेत् प्रकृतेऽपि तुल्यं
स च योगी द्विविधः युक्तो वियुक्तश्च तत्र युक्तानां कदाचित्समाधिः कदाचिद्व्युत्थानं समाधिश्च
इंद्रियाणि विषयेभ्यः प्रत्याहृत्य साक्षात्कार्यवस्तुनि आदरेण मनोधारणं कुर्वतां चिंतास
तानरूपः समाध्यभावो व्युत्थानं युक्तास्तु समाधिदशायामेवातीन्द्रियपदार्थदर्शिनो नान्य
काले अत्र च युक्तानां योगजधर्मसहितं प्रत्यासत्तिः वियुक्तास्तु अत्यंताभ्यासेन वशीकृत
मनसः सदैव समाधिस्थाः योगजधर्मवशादणिमाद्यष्टविधसिद्धियुक्ता एवं व्यवहितातीं

त्वादिषु न व्यभिचारः सामान्यादिनेत्यादिपदात्समवायाभावयोः परिग्रहः विशेषपदार्थेऽस्यातीन्द्रियत्व
पातत्र व्यभिचारासंभवात् सामान्यवत्त्वे सति समवायसंबंधेन यत्किंचित्पदार्थवत्त्वे सतीत्यर्थः तेन
सामान्यपदार्थप्रविष्टनित्यत्वादेर्नैव पर्याप्ती सामान्यादीति सामान्यादिपदस्य त्रयस्याविशेषसमवाय
भावरूपस्य तत्सामान्येन समभेदानुष्ठ यमित्यर्थः एतदनुमानेन शब्दस्यानित्यत्वसिद्धिः पूर्वोक्तप्र
त्यभिज्ञानानेकाग्रतिरिति चेदुच्यते प्रत्यभिज्ञानात्पूर्वानुभूतगकारेणानुभूयमानगकारस्याभे
दोऽवधृतेः अभेदो हि भेदाभावः स च द्विविधः गत्वावच्छिन्नप्रतियोगिताकः सामान्यभेदः तद्
त्वावच्छिन्नप्रतियोगिताको विशेषभेदश्च तत्रोत्पन्नो गकारो विनष्टो गकार इति प्रतीतेस्तद्व
क्तिभेदाभावस्य बाधितत्वात् गत्वावच्छिन्नसामान्यभेदाभाव एव तज्जातीयत्वरूपः प्रत्यभि
ज्ञाया विषयः यथा पूर्वं या लिपिः सैवेदानीं लिखितेत्यादौ नोहवर्णवन्नस्यादिरूपलेखायालि
पेरापेक्षिकस्य लिप्यन्तरेण नित्यत्वं निन्द्यः शब्दस्यानुमानेन च साधनावच्छिन्नसाध्यव्यापकसत्ताभा
ववत्त्वमुपाधिः अनित्यत्वानुमानेन बलवता बाधश्च अपि च ह्रस्वदीर्घप्लुतत्वादि चैत्रादिप्रयोज्यनाद
स्योदकजातिभिन्नश्चैत्रोच्चारितत्वानुमानस्यानुम[illegible] विकृततया शब्दस्य न नित्यत्वेन च धनेरेवा
नन्तरं अनित्यत्वात् तत्रता एव ता हय जालपदु निवाच्य वर्णव त्तित्वे बाधकाभावान्न च सोऽयं ग
कार इति प्रत्यभिज्ञैव बाधिकेति वाच्यं सेयं गुर्जरीत्यादिप्रत्यभिज्ञाया धनावपि तुल्यत्वात् समा
नस्य तज्जातीयत्वमेव विषय इति वक्तव्यत्वात् तत्र वर्णेऽपि तुल्यं किं च वायुसंयोगादेः कार्यतावच्छे
दकं भवन्मते कप्रत्ययत्वं वाच्यं कस्य नित्यत्वात् मन्मते तु कत्वमेव तत्पुनरिति लाघवतः कोपनि
त्यत्वानुमानसहकारि[illegible]तावच्छेदक इति तुल्य

वेतिप्याधिकारणापगुणपदं दुःखं निरूपयति पीडेति पूर्ववत्सर्वं लक्षणे सुखस्थाने दुःखपदं प्रतिकूले
ति प्रतिकूलत्वेन निषेध्यत्वेन ममेदं मास्त्विति ज्ञानविषयत्वमित्यर्थः द्विष्टसाधनता विषयकजन्य
ज्ञानाजन्ये द्वेषविषयकगुणत्वे तत्त्वं तेन तपःक्लेशादौ मुनीनां प्रतिकूलवेद्यत्वाभावेपि न क्षतिः
पदव्यावृत्तिः पूर्वरीत्यावोध्यः सुखाभावकारणापगुणपदं ननु सुखाभाव एव दुःखमस्तु किं माति
रिक्ते नेति चेन्न घटादेरपि दुःखत्वप्रसंगः सुखध्वंस इति चेत् स्वर्गेपि दुःखानुभवप्रसंगः
पूर्वसुखध्वंसानां विद्यमानत्वात् सुखासमानकालीनसुखध्वंसस्तथेति चेन्न नरकेपि दुःखानुभ
वो न स्यात् स्वर्गीयसुखसमानकालीनत्वात् समानाधिकरणसुखासमानकालत्वं विवक्षितमि
ति चेदिदानीं तनानां दुःखाभावप्रसंगः सर्वेषामेव ध्वंसानां तादृशसुखसमानकालत्वेन त
द्भिन्नत्वाभावात् चरमदुःखध्वंसस्यैव तथात्वात् तादृशसुखानधिकरणकालवृत्तित्ववि
वक्षायां स्तस्येति चेत् सुषुप्तावपि दुःखापत्तेः नच सुषुप्तौ तत्सत्वेपि त्वङ्मनोयोगाभावात् नानुभव
इति वाच्यं प्रत्यक्षात् सुखदुःखयोः प्रमाणभावात् एतादृशदुःखध्वंसस्यैव सुखत्वेपित्य।
स्यापि सुखत्व तथापि विनिगमनाविरहेणाभावरूपगुणत्वमित्यलं बहुना इच्छां लक्षयति राग इति
पूर्ववत् इच्छात्वमित्यनुभवविषयगुणत्वे तत्त्वं प्रत्नोत्कट इच्छा राग इति इच्छाविशेषो रागो वो
ध्यः एतत् ईश्वरस्य न रागित्वं द्वेषं निरूपयति क्रोध इति यद्यपि क्रोधद्वेषयोः न पर्यायता
नरकादौ क्रोधाभावेपि द्वेषात् तथा च द्वेषविषय एव क्रोध इति प्रतिपादयितुं तथाभिधानं
द्विष्टार्थसाधनीभूतचेतनविषयकद्वेषस्यैव क्रोधत्वात् न हि कण्टकादिषु द्वेषे क्रोधव्यवहारः

ग्र॰ कौ॰ ६३ व राम ६३ 49

द्रियविषयग्रहणरूपवहिरिन्द्रियसिद्धिमान् कालविप्रकृष्टातीतानागतपदार्थग्रहणरूपमानस
सिद्धिमन्तः सिद्धादेवसर्वज्ञाः तदुक्तं शब्दानेषशृणोति योजनशतादित्यादि तेषां योगजध
र्मः सर्वेन्द्रियाणामेव प्रत्यासत्तिः योगेन धर्मोत्पत्तौ निदिध्यासितव्य इत्यादिविधिघटकवाक्यमन्तर्म
नसो वहिरस्वात्तत्रापि स्वप्नेपि मनोयोगस्वात्र योगजधर्मः सहकारी उच्यते फलस्य प्रमाणसि
द्धत्वादिति संक्षेपः ॥ अधिकं गुणकिरणावल्यादावनुसंधेयं बुद्धिं लक्षयति अर्थेति प्रकाशो
ज्ञानं पर्यायस्य कथनेन मनोरूपबुद्धिरित्यादिना सांख्याभिमतमनोरूपबुद्धेर्नित्यविज्ञान
मानन्दं ब्रह्मेत्यादिना वेदान्ताभिमतप्रकाशस्वरूपात्मनश्च निरासः आत्मगुणत्वे सतीति क्वा
कौंच चिदप्यपि वेदान्तसंमतात्मस्वरूपस्य निरासः ज्ञानरूपाबुद्धिः न मनो नात्मेति भावः तत्तदु
पेत्तत्र पर्यायस्य प्रयोगसंभवात् इत्यधिकमग्रे दर्शयिष्यते लक्षणं ज्ञानामीत्यनुव्यवसायविषय तु९
वृत्तिगुणत्वव्याप्यजातिमत्वं आत्मन्यतिव्याप्तिवारणाय गुणत्वेति अनुव्यवसायाविषये
परमाणावव्याप्तिवारणाय जातिघटितं सुखं निरूपयति प्रीतिरिति पर्यायकथनेन प्रमाण
मादर्शितं ज्ञातोस्मि सुखी भवामीत्यादिप्रत्यक्षेण व्यवहारेण च सुखं सिद्धमिति भावः लक्षणं तु
अहं सुखीत्याद्यनुभवविषयगुणत्वं गुणपदप्रयोजनं पूर्ववदूह्यं धर्मान्निरसाह तदुक्तेति अनु
कूलत्वेन स्वीयत्वेन ममेदमस्त्विति क्रमेण वेदनीयं ज्ञानविषयीभूतं सुखं तल्लक्षणमित्यस्व
वनित्तियच्चतेत्तत्सुखमित्यर्थः यज्ञादीदं परदृष्टोपभोगादिजन्यसुखसाधनत्वाद्इष्टदर्शनाद
व्याप्तं तथापीष्टसाधनताविषयजन्यज्ञानाजन्यजन्यत्वविषयगुणत्वं वाच्यं सुखसाधन
भोजनादावतिव्याप्ति [illegible] जन्ये नि दुःखाभा

चेत्तदनुपपत्त्वेनापि गुणो विशेषणीयः आत्मादौ व्यभिचारवारणायेदं नोक्तत्वं न मैत्रादिशरीरे व्यभिचार
वारणाय देवदत्तस्येति भोगः सुखदुःखसाक्षात्कारः एकैकोपादानेनेदं तु इयं तात्पर्यं तेननैकतर
वैयर्थ्यं दृष्टांतस्य साध्यविकलत्ववारणाय दृष्टान्ते देव. दत्तस्येति वस्तुग्रहादि रूपमित्यर्थः एत
धर्मे तावल्लभ्यं साध्यं दर्शयति यत्नेति यत्नादिनाऽर्पित्तिं वारयति यत्नादीनामिति आद्यश
रीरोत्पत्तिकाल शरीराभावेन देवदत्तीयप्रयत्नादेरसंभवादिति भावः संस्कारं निरूपयति संस्कार इति
अत्र चात्मविशेषगुणवृत्तिमूर्तवृत्ति वृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वमिति सामान्यलक्षणं बोध्यं
रूपत्वादिवारणायात्मेति संख्यादिवारणाय विशेषेति ज्ञानत्वादिवारणाय मूर्तेति अवांतरभेदा
न्दर्शयति वेगइत्यादि मनोवृत्तिवृत्तिसंस्कारत्वव्याप्यजातिमत्त्वं वेगत्वं आत्मवृत्तिसंस्कारत्वं
भावनात्वं पृथिवीवृत्तिवृत्ति मनोवृत्त्यवृत्ति संस्कारत्वव्याप्यजातिमत्त्वं स्थितिस्थापकत्वं भावना
यामतिव्याप्तिवारणाय पृथिवीति वेगेतिव्याप्तिवारणाय मन इति रूपेतिव्याप्तिवारणाय संस्कार
त्वेति तेषां मध्ये वेगविशेषं दर्शयति पृथिवीति वेगस्य लक्षणं तरमाह क्रियाहेतुरिति क्रियाहेतु
वृत्तिमनोवृत्तिसंयोगावृत्तिजातिमत्त्वमर्थः संख्यात्वादिवारणाय क्रियेति स्थितिस्थापकवा
रणाय मन इति संयोगत्वादिवारणाय संयोग इति भावनालक्षयति भावनेति आत्मेति उक्तं प्रा
गेव लक्षणं तरमाह अनुभवेति उपलक्षणमेतत् स्मृतेरपि संस्कारजनकत्वात् तथा च जन्य
ज्ञानजन्यसंस्कारत्वं स्मृतिजनकसंस्कारत्वं च भावनात्वमिति भावः ईश्वरज्ञानादिजन्य
वेगादिवारणाय जन्यपदं पूर्वलक्षणे अत्र च घटत्वप्रकारक घटविशेष्यकसंस्कारं प्रत्यु
पेक्षान्यनाशेन निष्प्रपत्वेन हेतुना घटविषयोत्पन्नास्तत्वैव संस्कारानुत्पत्तेरिति न च स्मृतिं प्रत्येव

संशयसत्वे

गौ. का.
८४

वृ. ति. ८

व्या. १
वृ. ति. ६

50

ताम
२४

प्रामाणिकोऽमतश्चेत्तनपदं पत्नलक्षणेति उत्साह इति अत्रापि पत्नविशेषणं चोत्साहो बोध्यः विशेषणं च सु
खविशेषजनको भक्तकर्मविषयकत्वं पथा कृत्वा युद्धादौ स्त्रीणां वरकर्तृ दर्शनादौ भारवाहनाय तर्कुं लय
नो उत्साहपदाप्रयोगात् करोमीत्यनुभवविषयवृत्तिगुणत्वव्याप्यजातिमत्त्वं प्रयत्नत्वं बुद्ध्यादीनामेकस्मा
धर्म्मोमाह बुद्ध्यादयः इति मानसप्रत्यक्षविषयवृत्तिगुणत्वव्याप्यजातिमत्त्वमित्यर्थः तेन निर्विकल्पक
जीवन योनियत्नेश्वरयोगिज्ञानादिषु नाव्याप्तिः षट्पदं चादृष्टादीनां लक्षणविभावना । धर्म्माधर्म्मौ
लक्षयति धर्मेति लक्षणं इ येतात्पर्यं सुखासाधारणकारणं धर्मत्वं सुखमन्यदपि कालादिवारणाय असा
धारणपदं इदं च यद्यपि कामुकसुखादिजनके कामिनीदर्शनादावतिव्याप्यकं तथापि यागजन्यस्वर्ग
जनकवृत्तिगुणत्वव्याप्यजातिमत्त्वं तत्त्वं गङ्गाजलसंयोगादेरपि स्वर्गहेतुत्वाद्यागजन्येति यागजन्य
प्रत्यक्षत्वं वारणाय स्वर्गेति स्वर्गजनककीर्तनादिनष्टे धर्मे अव्याप्तिवारणाय गुणत्वेति एवं निषिद्धक
र्मजन्यनरकजनकवृत्तिगुणत्वव्याप्यजातिमत्त्वमधर्मत्वं तेन कण्टकसंयोगादेः दुःखासाधारणका
रणत्वेऽपि न क्षतिः ईश्वरज्ञानत्वादिवारणाय जन्येति अन्यत्पूर्ववत्सा ननु दृष्टसामग्रीवशादेवकार्योत्प
त्तिसंभवे अदृष्टे किं प्रमाणं तत्र श्रुत्यादि प्रामाण्यसंभवेऽपि तत्प्रामाण्यमनभ्युपगन्तारं प्रत्यनुमानं दर्शयति
देवदत्तेति चैत्रशरीरादौ बाधवारणाय देवदत्तस्येति पक्षविशेषणं आदिपदाद्विपयपरिग्रहः अत्र
च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात्तेन द्वितीयादिशरीरादेर्जीनादिजन्यतासंभवा
न्नांशतः सिद्धसाधनं दोषाय आद्यत्वेन पक्षो विशेषणीय इति कश्चित्तत्र आद्यशरीरोत्पत्तिकाल
देवदत्तीयज्ञानादेरसंभवात् ईश्वरगुणविशेषमादायार्थान्तरवारणाय साध्ये देवदत्तस्येति एक
त्वादिवारणाय विशेष[illegible] मिति न तेनार्थान्तरं

मेणे निरासः लक्षणमाह गुणत्ववदिति अनेन पूर्वोक्तगुणलक्षणं स्मारयति यथा सामान्यवानसमवायि
कारणमस्पंदात्मा गुण इति तत्र लक्षणे स्पंदपदस्थाने गुणपदं गुणपदस्थाने स्पंदपदं चेद्भवति त
देव कर्मलक्षणवाक्यं भवतीति भावः व्याख्यापूर्वं वत्तलक्षणान्तरमाह द्रव्येति सत्तासाम्मान्यव्या
प्यमात्रपदं द्रव्यभिन्नसमवेतत्वे सति नित्यद्रव्यासमवेतत्वमर्थः तेन न विशेषपदार्थेतिव्याप्तिः
तस्य नित्यद्रव्यमात्रसमवेतत्वात् द्रव्यगुणभिन्नत्वे सती त्यपि विशेषणीयं तेन न तयोरतिव्याप्तिः
सामान्यान्तरमाह विभुरिति अविभुः परममहत्परिमाणाभाववत् द्रव्यस्य परिमाणेनावच्छिन्नप
रिमाणेनेत्यर्थः तदेव पर्यायशब्देन कथयति मूर्तत्वापरेति एकेति एकस्मिन्द्रव्ये समवेतमित्य
र्थः तथा च मूर्तत्वव्याप्यता वच्छेदकपदार्थ [illegible] विभज्यकोपधि
मत्वं लक्षणमित्यर्थः द्रव्यत्वगुणत्वादिवारणाय मूर्तत्वव्याप्येति घटत्वादिवारणाय पदार्थेति
लक्षणान्तरमाह विभागेति उत्तरसंयोगहेतुत्वं पूर्वसंयोगनाशस्यैव न कर्मण इति मतनिरासाय
विभागपूर्वसंयोगनाशयोर्द्वारत्वप्रदर्शनं तथा च व्यापारेण व्यापारिणो नान्यथासिद्धिरिति भावः
हेतुपदं समवायिकारणपरं तेन न द्रव्यादावतिव्याप्तिः तेन संयोगविभागासमवायिकारणत्वं क
र्मत्वमिति सिद्धं एकैकासमवायिना संयोगविभागयोरित्यव्याप्तिरित्युभयोपादाने अत एव संयो
गविभागयोरनपेक्षकारणमिति वैशेषिकसूत्रे अनपेक्षकारणं असमवायिकारणमिति तर
त्नपंथाः तदवांतरभेदान्दर्शयति उत्क्षेपणत्वादयः कर्मत्वव्याप्यजातिविशेषा वि
जातीयत्वं तत्संयोगजनकतावच्छेदकतया प्रत्यक्षानुमानसिद्धा एवमूर्ध्वदेशसंयोगासमवायिका
रणं कर्म उत्क्षेपणं तथाधः संयोगासमवायिकारणं कर्म अपक्षेपणं अभिमुखदेशसंयोगास

ताद्दशनिश्चयत्वेन हेतुतास्तु संस्कारं प्रति तु ज्ञानत्वेन हेतुतेति वाच्यं तथा सत्युपेक्षादितः स्मृत्यज
नकत्वे ऽसंस्कारकल्पनापत्तेः तथा घटत्वप्रकारक घट विशेष्यकस्मृतिं प्रति घटत्व प्रकारक
घटविशेष्यक संस्कारत्वेन हेतुता अन्यथा घटादिसंस्कारात्पटादिस्मरणापत्तेः एवं सति स्मृति
प्रति ज्ञानत्वेनैव हेतुतालाघवात् ननु तत्रापि समानप्रकारकत्वादिनिवेशः संस्कार कार्यकार
णभावेनैवातिप्रसंगनिरासात् इत्यलं बहुना तस्य स्मृतिजनकतायां सहकारिणमाह उद्बुद्ध इति उ
द्बोधपदार्थमाह उद्बोधश्चेति लाभः समवधानं एककालवृत्तित्वमिति यावत् सहकारिणो विशि
ष्य दर्शयति सहकारिणश्चेत्यादिना सदृशेति सादृश्यज्ञानस्योद्बोधकत्वं यथा शुक्तिदर्शनाद्र
जतस्मरणादिस्थले एवं ज्ञातमात्रस्य तत्त्वप्रणोनेष्टसाधनता स्मरणस्थले जीवनादृष्टस्योद्बोध
कता विस्मृतश्लोकादिस्मरणे मनः प्रणिधानस्य चापि चिन्तायां उद्बोधकत्वं आद्यपदेन संबंधि
दर्शनादेर्ग्रहणं यथा हस्तिपकदर्शनात् हस्तिनः स्मरणं ह्यनित्यस्यापकत्वलक्षणपति स्थितीति स्पर्शेति
वेगवदस्पन्दपावत्स्पर्शवद्वृत्तित्वं घटादावेवाभावादिति द्योतयितुं विशेषपदं लक्षणं तु पूर्वो
क्तलक्षणे पृथिवीपदस्थाने स्पर्शवत्पदप्रक्षेपादवगंतव्यं ग्रन्थकृत् आदिपदात् शरणादिग्र
हणं नामित्यस्य धनुरादेः पुनस्तादृगवस्थापूर्वरूपतापादकस्तत्संपादकक्रियाविशेषहे
तुरित्यर्थः बुद्ध्यादिभावनांतानामेकं साधर्म्यमाह एत इत्यादिना आत्मेति रूपादावतिव्याप्ति
वारणाय संख्यादावतिव्याप्तिवारणाय विशेषेति गुणा कृष्णा इति द्रव्यास्युक्तानीति वद्धात्वे
पं संप्रतिकर्मणो लक्षणीयेलक्षनिरूपणार्थं पर्यायशब्दमाह चलनेति चलनं गमनं तदात्मकं
तज्जातीयस्वरूपं तन [illegible] कर्त्वं यद्रूपस्य वाक्।

गौ॰ कां॰
८६

प्रसिद्धं लक्षणमाह नित्यमिति संयोगविभागादिवारणाय नित्यमिति एकपदं स्वरूपकथनमात्रं न तु लक्षण
घटकं अव्यावर्तकत्वात् आत्मैकत्वादिव्याप्तिवारणाय अनेकेति अनेकसमवेतमित्यर्थः तेनात्यन्ताभावादि
वारणं अवान्तरभेदं दर्शयति तच्चेति परमिति परं व्यापकं अपरं व्याप्यमित्यर्थः परं दर्शयति तत्रेति सत्ता
रूपं सामान्यं परं सामान्यान्तरस्य सकलस्य व्यापकमिति निर्बाधं हेतुमाह बहुतीति सामान्यान्तरापेक्षया आधि
क्यदेशसंबद्धत्वात् प्रमेयत्ववदिति भावः अत्र समवायविशेषणं ज्ञानादिकवारणं संबद्धत्वमेकं हेतुनिष्ठ
तेन दृष्टान्ते समवेतत्वाभावान्न साधकवैकल्यं व्यतिरेके घटत्वादिकं वा दृष्टान्तो बोध्यः तस्य लक्षणान्तर
माह अनुवृत्तीति मात्रपदं द्रव्यत्वादिवारणाय तदर्थश्च अनुगतानुवृत्तिप्रत्ययप्रकारत्वे सति स्वाश्रयस्य
जातिमदपेक्षया अव्यावर्तकत्वे सति जातिमत्प्रतियोगिकभेदसाधने व्यभिचारित्वं प्रमेयत्वादिवा
रणाय सत्यन्तं घटत्वादिवारणाय विशेष्यं सामान्यादेरपि व्यावर्तकतया असंभववारणाय जातीति सामा
न्यमात्रमिति सामान्यमेव उच्यत इति शेषः एतत्पदेन वक्ष्यमाणसामान्यविशेषसंज्ञा निरासः अपरमिति
द्रव्यत्वादिजात्यन्तरं व्याप्यं सत्तापेक्षया अल्पदेशवृत्तित्वात् घटत्वादिवदिति शेषः व्यावृत्तेरपीति जा
तिमत्प्रतियोगिकभेदसाधकत्वादिति भावः अपिकारादनुवृत्तिप्रत्ययसमुच्चयः लक्षणं पूर्ववत् अनुवृ
त्तिप्रत्ययहेतुत्वं सामान्यपदस्य व्यावृत्तिहेतुत्वं च विशेषपदस्य प्रवृत्तिनिमित्तमिति पंचम्यार्थः उच्यते
अनुगताकारस्य अलीकत्वात् वादिनो बौद्धस्य मतं दर्शयति अत्र केचिदिति व्यक्तीति अयं भावः अयं घ
टः इत्यादि सविकल्पके अतद्व्यावृत्तिरेव प्रकारतया भासते सा च घटेतरभेदरूपा अभावस्य तु तुच्छस्या
नतिरिक्ततया अलीकस्वरूपैव किमालंबनेनेति किं विषयेत्यर्थः अयमाशयः यथा अयं घटोयं घट इति
ज्ञानयोर्विषयभेदकत्वेनैव लक्षणं न तथा घटोयं पटोयमिति ज्ञानयोर्भिन्नविशेष्ययोरपीति सर्वानु

राम
८६

52

मवायिकारणमाकुंचनं तिर्यक्संयोगासमवायिकारणं प्रसारणं अग्रिमतोत्तरदेशसंयोगासमवायि
कारणं गमनमिति बोध्यं नन्वन्यान्यपि कर्माणि विद्यमानाः संति तत्कथं पंचैव दर्शितानि इत्यत आह भ्रमणाद
पठन्ति आदिपदाद्रेचनस्पंदोर्ध्वज्वलनतिर्यग्गमनमनानान्तर्मतोदीनां ग्रहणं सामान्यलक्षणमि
